2026

संस्कृतसाहित्यम्

UGSSDS 604

महाकाव्यसाहित्यम्-2

पूर्णाङ्काः - 60

समयः - $2\frac{1}{2}$ घण्टा

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् 1×10=10

1. श्रीहर्षस्य प्रमुखः ग्रन्थः कः ?
2. श्रीहर्षस्य मातुर्नाम किम् ?
3. शिशुपालवधमहाकाव्यस्य मुख्यरसः कः ?
4. शिशुपालवधमहाकाव्यस्य प्रथमसर्गस्य नाम किम् ?
5. शिशुपालवधमहाकाव्यस्य अपरं नाम किम् ?
6. नैषधीयचरिते कति सर्गाः सन्ति ?
7. नैषधीयचरितस्य उपजीव्यं किमस्ति ?
8. दुर्योधनस्य अपरं नाम किम् ?
9. श्री-शब्देन किन्तावत् महाकाव्य प्रारभ्यते ?
10. अर्थगौरवाय कः कवि प्रसिद्धः ?

अधोलिखितानां पञ्चानां टिप्पणी / व्याख्या विधेया - 6×5=30

11. शिशुपालवधम्
12. भारविः
13. विहङ्गराजाङ्गरूहैरिवायतैर्हिरण्मयो वींरुहवल्लितन्तुभिः ।
    कृतोपवीतं हिमशुभ्रमुच्चकैर्धनं घनान्ते तडितां गणैरिव॥
14. निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधा सुधामपि ।
    नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥
15. अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्ग गुणेन विस्तरम् ।
    अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् ॥
16. स किंसखा साधु न शास्ति योऽधिपं, हितान्न यः संशृणुते स किं प्रभुः ।
    सदानुकूलेषु हि कुर्वते रतिं, नृपेष्वमात्येषु च सर्वसम्पदः ॥
17. व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
    प्रविश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान्निशिता इवेषतः॥

अधस्तनेषु द्वौ प्रश्नौ समाधेयौ - 10×2-20

18. "नैषधे पदलालित्यम्"- इत्युक्तेः तात्पर्यम् विवेचयत
19. "माघे सन्ति त्रयो गुणाः"- उक्तिरस्याः तात्पर्यम् आलोच्यताम्।
20. नैषधीयचरितमिति महाकाव्यस्य प्रथमसर्गस्य कथावस्तु समासेन लिख्यताम्।
21. "किरातार्जुनीयम्" महाकाव्यस्य प्रथमसर्गमधिकृत्य युधिष्ठिरं प्रति वनेचरस्य उक्तिः आलोच्यताम्।

****